"गुरुपत्नीन्तु युवतीं नाभिवादयेत पादयोः ।
कुर्व्वीत वन्दनं भूयो भगो वोऽहमिति ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
अभिवादनशीलः स्यात्नित्यं वृद्धेषु धर्म्मतः ।
असावहम्भो नामेति सम्यक् प्रणतिपूर्व्वकम् ॥
आयुरारोग्यसिद्ध्यर्थं तन्द्रादिपरिवर्ज्जितः ।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ॥
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरः प्लुतः ।
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥
सव्यसव्यपाणिना कार्य्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥"*॥
अभिवादनीया गुरवो यथा,—
"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥
माता मातामही गुर्व्वी पितुर्म्मातुश्च सोदराः ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम् ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥"
इति कूर्म्मपुराणे ११ अध्यायः ॥ *॥
अथ सप्तधा नतिलक्षणानि ।
"त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम् ।
दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणम् ॥
ऐशानी वाथ कौवेरी दिक् कामाख्याप्रपूजने ।
प्रशस्ता श्मशानादौ च सर्व्वकर्म्मसु सर्व्वतः ॥
त्रिकोणादिव्यवस्थाञ्च यदि पूर्व्वमुखो यजेत् ।
पश्चिमात् प्राग्भवीं गत्वा व्यवस्थां निर्द्दिशेत्तदा ॥
यदोत्तरामुखः कुर्य्यात् साधको देवपूजनम् ।
तदा याम्यान्तु वायव्यां गत्वा कुर्य्यात्तु संस्थितिम् ॥
दक्षिणादायवीं गत्वा दिशं तस्माच्च प्राग्भवीम् ।
ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् ।
त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः ॥१॥
दक्षिणादायवीं गत्वा वायव्यात् प्राग्भवीं ततः ।
ततोऽपि दक्षिणं गत्वा तां त्यक्त्वाग्नौ प्रविश्य च ॥
अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् ।
उत्तराच्च तथाग्नेयीं भ्रमणं द्वित्रिकोणवत् ।
षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः ॥२॥
दक्षिणादायवीं गत्वा तस्मादावृत्य दक्षिणम् ।
गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः ॥ ३ ॥
सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृतिसाधकः ।
नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः ॥४॥
त्यक्त्वा स्वमासनस्थानं पश्चाद्गत्वा नमस्कृतिः ।
प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत् ।
दण्ड इत्युच्यते देवैः सर्व्वदेवौघमोददः ॥ ५ ॥
पूर्व्ववद्दण्डवद्भूमौ निपत्य हृदयेन तु ।
चिवुकेन मुखेनाथ नासया ललिकेन च ॥
ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात् ।
तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः ॥६॥
प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृतिः ।
ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यान्नमस्कृतौ ।
स उग्र इति देवौघैरुच्यते विष्णुतुष्टिदः ॥ ७ ॥
नदानां सागरो यादृग्द्विपदां ब्राह्मणो यथा ।
नदीनां जाह्नवी यादृग्देवानामिव चक्रधृक् ।
नमस्कारेषु सर्व्वेषु तथैवोग्रः प्रशस्यते ॥
त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः ।
चतुर्वर्गं लभेद्भक्तो न चिरादेव साधकः ॥
नमस्कारो महायज्ञः प्रीतिदः सर्व्वतः सदा ।
सर्व्वेषामपि देवानामन्येषामपि भैरव ! ॥
योऽसावुग्रो नमस्कारः प्रीतिदः सततं हरेः ।
महामायाप्रीतिकरः स नमस्करणोत्तमः ॥"
इति कालीपुराणम् ॥
नमस्कारी, स्त्री, (नमस्कारस्तदञ्जलिरिव पत्रसङ्कोचोऽस्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) खदिरिकाशाकः । लाजालु इति ख्यात इति केचित् ॥ किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायाम् । सङ्कोचपची लज्जालुरिति लज्जालुकायां पठितम् । अञ्जलिरूपपत्रत्वादञ्जलेर्नमस्कारव्यञ्जकत्वात् नमस्कारप्रीतेव नमस्कारी। इत्यमरटीकायां भरतः ॥ (अस्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"गण्डकाली नमस्कारी समङ्गा खदिरी कचित् ॥")
नमस्यः, त्रि, (नमस्य नामधातुः + कर्म्मणि यत् ।) नमस्कारयोग्यः । यथा,—
"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ॥"
इति मलमासतत्त्वम् ॥
नमस्या, स्त्री, (नमस्य + भावे अः । स्त्रियां टाप् ।) पूजा । इत्यमरः । २ । ७ । ३५ ॥
नमस्यितः, त्रि, (नमःकृतमिति । नमस् + "नमोवरिवः इति ।" ३ । १ । १९ । इति क्यच् ।) पूजितः । इत्यमरः । ३ । १ । १०१ ॥
नमितः, त्रि, नमोऽस्य जात इत्यर्थे इतच्प्रत्ययनिष्पन्नः । जातनमस्कारः । नामितः । यथा,—
"अपः शालग्रामाद्भवनगरिमांकारसरसाः
सुधीः को वा कौपीरपि नमितमूर्द्धा न पिबति ।"
इति विदग्धमाधवनाटकम् ॥
नमुचिः, पुं, (न मुञ्चतीति । मुच + इन् । स च कित् ।) कन्दर्पः । दैत्यभेदः । इति मेदिनी । चे, १४ ॥ यथा,—
"कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ! ।
तस्यान्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥"
इति वामने ५२ अध्यायः ॥
(इन्द्र एनं निहतवान् । यथा, महाभारते । ९ । ४३ । ३३—३९ ।
"नमुचिर्वासवाद्भीतः सूर्य्यरश्मिं समाविशत् ।
तेनेन्द्रः सख्यमकरोत् समयञ्चेदमब्रवीत् ॥
न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि ।
वधिष्याम्यसुरश्रेष्ठ ! सखे ! सत्येन ते शपे ॥
एवं स समयं कृत्वा दृष्ट्वा नीहारमीश्वरः ।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः ॥
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वयात् ।
भो मित्रहन् ! पापेति ब्रुवाणं शक्रमन्तिकात् ॥")
नमुचिद्विट्, [ष्] पुं, (नमुचिं द्वेष्टीति । द्विष् + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) इन्द्रः । यथा, माघे । १ । ५१ ।
"विगृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्द्दिवं दिवः ॥"
नमुचिसूदनः, पुं, (नमुचिं दैत्यविशेषं सूदयतीति । सूदि + ल्युः ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥
नमेरुः, पुं, (नम्यते इति । नम + बाहुलकात् एरुः ।) रुद्राक्षः । इति भूरिप्रयोगः ॥ सुरपुन्नागः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ४ । ७४ ।
"विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ॥")
नमोगुरुः, पुं, (नमस्करणीयो गुरुः ।) नमस्कारैर्गुरुः । ब्राह्मणः । इति कश्चित् शब्दरत्नावली ॥
नम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । नम्बति । इति दुर्गादासः ॥
नम्रः, त्रि, (नमतीति । नम + "नमिकम्पीति ।" ३।२।१६७ इति रः ।) नतः । इति हलायुधः ॥ (यथा, पञ्चतन्त्रे । २ । १९८ ।
"यन्नम्रं सरलञ्चापि तच्चापत्सु न सीदति ।
धनुर्मित्रं कलत्रञ्च दुर्लभं शुद्धवंशजम् ॥")
नम्रकः, पुं, (नम्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वेतसः । इति भावप्रकाशः ॥ (नम्र एव । स्वार्थे कन् । नते, त्रि ॥)
नय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, नयते । इति दुर्गादासः ॥
नयः, पुं, (नीयतेऽनेनेति । नी + "एरच् ।" ३ ।३ । ५६ । इत्यच् ।) नीतिः । तत्पर्य्यायः । नायः २ इत्यमरः । ३।२।८ ॥ (यथा, पञ्चतन्त्रे ।२।१८५ ।
"कथञ्चिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥")
द्यूतविशेषः । इति मेदिनी । ये, ३३ ॥ नैगमादेः । इति हेमचन्द्रः ॥ न्याय्ये नेतरि च त्रि । इति शब्दरत्नावली ॥
नयनं, क्ली, (नीयते दृष्टिविषयोऽनेनेति । नी + करणे ल्युट् ।) चक्षुः । इत्यमरः । २ । ६ ।९३ ॥ (यथा, मार्कण्डेये । ९८ । ४० ।
"नीलोत्पलाभनयनां पीनश्रोणिपयोधराम् ॥")
नी ञ प्रापणे इत्यस्माद्भावे ल्युट्प्रत्ययः ॥ प्रापणम् । (आनयनम् । यथा, हरिवंशे । १२७ । ११ ।
"तस्य द्वितञ्च देवेश ! श्रूयतां वदतो मम ।
नयनं पारिजातस्य द्वारकां मम रोचते ॥")